International Journal of Sanskrit Research 2017; 3(1): 04-05

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2017; 3(1): 04-05
© 2017 IJSR
www.anantaajournal.com
Received: 02-11-2016
Accepted: 03-12-2016

**डॉ0 भानुप्रताप मिश्र**
पी0एच0डी0
बी0एच0यू0 वाराणसी, उत्तर प्रदेश, भारत

**Correspondence**
**डॉ0 भानुप्रताप मिश्र**
पी0एच0डी0
बी0एच0यू0 वाराणसी, उत्तर प्रदेश, भारत

# वैयाकरणमीमांसकानाममते वाक्यार्थ प्रतिभास्वरूप विचारः

**डॉ0 भानुप्रताप मिश्र**

शब्दस्वरूपतन्निष्ठशक्तिरूवरूपनिरूपणप्रस्तावे ''सिद्धे शब्दार्थ सम्बन्धे''[1] इति भाष्य वार्तिक सिद्धस्य–नित्यस्य अखण्डात्मकवाक्यस्फोटस्य, तन्निष्ठायाश्च शक्तेः स्वरूपं निरूप्यार्थविषये वादिनां सन्त्यनेकेपक्षाः। ते तत्तच्छास्त्रवासनावशात् कल्पिता एव। यथा–मीमांसकेषु कुमारिलभट्टोऽभिहितान्वयवादी संसर्गमेव वाक्यार्थमनुते, अन्विताभिधानवादी प्रभाकरस्तु संसर्ग पदार्थं स्वीकरोति, शाब्दिकाश्च प्रतिभावाक्यार्थमुररीकुर्वन्ति। एवळच जातिः पदार्थः, व्यक्तिर्वा इत्यादि विषये भूषणे उक्तम्–

> एकं द्विकं त्रिकं चाथ चतुष्कं पळचकं तथा।
> नामार्था इति सेर्वऽमि पक्षाः शास्त्रे निरूपिताः।।[2]

अत एव घटः इति प्रयुक्ते वैशेषिकोऽतिरिक्तमवयविनं बुध्यते, गुणसमूहंसांख्यः, परमाणुसमूहं बौद्धादिः। यद्यपि ऋषिणां दर्शनं तत्वविषयकं भवति, तत्वळचैकमेव न तु भिन्नमिति महान् तावान् भेदः परिलक्ष्यते, तथापि तत्वभूतेन वस्तुना व्यवहारासम्भवात् व्यवहारकाले तेऽप्यदृष्टतत्त्वसदृशा नानाप्रकारैर्व्यवहरन्ति इति भेदः परिलक्ष्येतैव।

### अभिहितान्वयवादिमीमांसकमते

पदानामप्यर्थवत्वे पदार्थमात्र निरूपितैव शक्तिस्तेषु, न तु संसर्गांशनिरूपिता, एक पदार्थनिरूपितसम्बन्धानामानन्त्येन तत्र शक्तिकल्पने गौरवात्, आकाङ्क्षालभ्यत्वेन 'अनन्यलभ्यो हि शब्दार्थः' इति न्यायाच्च। एवळच पदात् प्रथमं पदार्थमात्रोपस्थितिः पश्चादकाङ्क्षादिवशात् सम्बन्धांशरूपवाक्यार्थस्योपस्थितिः। तथा च तात्पर्यवशादशक्य एव सम्बन्धांशरूपो वाक्यार्थः शाब्दबोधे प्रतीयते। उक्तंभाष्ये ''यदाधिक्यं सवाक्यार्थः'' इति। न चाशक्यस्य शब्दविषयत्वे घटपटादेकसम्बन्धिविधयोपस्थितस्याकाशस्यापि शाब्दबोधविषयत्वरूपातिप्रसबः स्यादिति वाच्यम्, स्वरूपसतः शक्यार्थान्वस्य शाब्दबोध नियामकत्वात्।
अभिहितानांस्वस्वपदैरूपस्थितानामर्थानामन्वयोऽभिहितान्वयः। अत एवाभिहितान्वयवादिन एते। एतन्मते तत्प्रकारक तद्विशेष्यकशाब्दबोधं प्रति तत्प्रकारकतद्विशेष्यकशक्तिज्ञानस्य कारणत्वम्। तथा च संसर्गे प्रकारताया विशेष्यताया वाऽसत्वेन शक्तिज्ञानविषयस्यैव प्रकारतया विशेष्यतया वा भाननियमेन शक्तिज्ञानविषयत्वाभावेऽपि न क्षतिः, आकाङ्क्षादिनैवान्वयबोधसम्भवात्, संसर्गविशेषबोधायाभिहितान्वयवादिनोऽप्याकाङ्क्षाज्ञानकारणत्वस्यावश्यकत्वात्। एवळच ''संसर्गो वाक्यार्थः'' इति समीचीनमेव। आकङ्क्षादिमत्पदसमूहस्यैव वाक्यात्वात् ''आकाङ्क्षा भाष्यः संसर्गः'' इत्यपि व्यवहारस्तत्र।

### अन्विताभिधानवादिनः

प्रभाकरास्तु–स्वार्थप्रतियोगिकपरार्थानुयोगिकसम्बन्धविशिष्टानामार्थानामभिधानमन्विताभिधानमिति अन्विताभिधानवादिन एते। ''देवदत्त गामानय'' इत्युत्तमवृद्धवाक्य प्रयोगात् देशात् देशान्तरं सास्नादिमन्तमर्थं मध्यमवृद्धे नयति सति अनेनास्मद् वाक्यादयमर्थः प्रतिपन्नः इति तच्चेष्टयाऽनुमाय तयोरखण्डवाक्यवाक्यार्थयोरर्थापत्यावाच्यवाचकभावरूपं सम्बन्धमवधार्य व्युत्पद्यते तटस्थः। ततस्तेनैवोत्तमेन ''चैत्र अश्वमानय'' ''देवदत्त गां नय'' इत्यादिवाक्येषु कस्यचिदन्यस्य पदस्यावापेकस्यचिदुद्धारे च यस्य पदस्य येनार्थेन सहान्वयव्यतिरेकौ उपलभते, तत्र तस्य शक्तिं निश्चिनोति। तच्च शक्त्यवधारणमन्विते एव पदार्थ पूर्वमन्वयएव वाक्यस्य शक्तिग्रहात् पदार्थमात्रे शक्तावुपजीव्यविरोधात्, व्यवहारेणान्वय विशिष्टज्ञानस्यैवोपस्थापनाच्च। न च वाक्यं विना क्वचिदाद्यव्युत्पत्तिः व्यवहारेणैवाद्यव्युत्पतेः, प्रवृत्तिनिवृत्तिरूपस्य च व्यवहारस्य पदमात्रेण कर्तुमशक्यत्वात्। अतो वाक्यस्थितानामेव पदानामन्वितेष्वेव पदार्थेषु शक्तिग्रहादन्विता एव पदशक्याः।

एतन्मते तद्विषयकशाब्दबोधं प्रति तद्विषयकशक्तिज्ञानं कारणम् इत्येव कार्यकारणभाव इति संसर्गविषयकबोधं प्रत्यपि शक्तिज्ञानस्य कारणत्वमपेक्षितम्। ननु तथापि संसर्गविशेषोऽशक्य एव पदार्थसामान्यान्वित एव शक्तिग्रहात्। अन्यथा 'गामानय' इति पदं श्रुत्वा अश्वमानय इति वाक्ये 'तदेवेदमानयपदम्' इत्यादिप्रत्यभिज्ञा न स्यात्, पूर्वस्य गवान्वितानयपदस्य अश्वान्वितानयेऽशक्तत्वेनार्थभेदेन भेदादिति चेत्, न पदार्थत्वेन सामान्येन विशेषाणामन्वये शक्तिग्रहात्। ''नहि निर्विशेषं सामान्यम्'' इत्याहुः। एवञ्चैतन्मतेऽपि सामान्य रूपेणैव संसर्गः पदशक्यः, विशेषरूपेण तु पदशक्यो वाक्यशक्य एव।

**शाब्दिकसम्मतं प्रतिभाया वाक्यार्थत्वम्–**

शाब्दिकैः वाक्यस्फोट एव सिद्धान्तत्वेन स्वीक्रियते। वाक्यस्फोटस्य चाखण्डत्वं तैरभ्युपगम्यते। एवञ्च पदपदार्थयोरभावात् क्रियापदस्य कारकपदस्य चासत्वात् ''क्रियाकारकभावरूपसम्बन्ध एव वाक्यार्थः'' व्यवहारोऽयं खपुष्पायेतेति तैः प्रतिभाया वाक्यार्थत्वं स्वीक्रियते। समर्थयते चामुमर्थं महावैयाकरणो भतृहरिः उक्तं स्वस्मिन् वाक्यपदीय ग्रन्थे–

विच्छेद ग्रहणेऽर्थानां प्रतिभाऽन्यैव जायते।
वाक्यार्थ इति तामाहुः पदार्थैरूपपादिताम्।।[3]

अस्यायं भावः– विच्छिन्नेभ्यो देवदत्तादिपदेभ्यः, तदर्थानां विच्छेदेनैव ग्रहणे प्रत्ययवेलायामेका पदार्थमतिव्यतिरिक्तैव प्रतिभा जायते। ताञ्च वाक्यार्थं वैयाकरणा आहुः। तस्याः प्रतिभाया उपायमाह 'पदार्थैः' 'इति। असत्यैरेवोपाधिभूतैः पदार्थैः' उपपादितम्। ''देवदत्तो ग्रामं गच्छति'' इति वाक्ये देवदत्तादिपदानां पृथक्–पृथक् अर्थे ज्ञायमाने पदार्थविषयकज्ञानतिरिक्ताः, असत्यैरेवोपाधिभूतैः पदार्थैभिव्यक्ता विलक्षणा काचन प्रतिभोपजायते। ताञ्च प्रतिभां शाब्दिकाः वाक्यार्थं वदन्ति। एवञ्च पदार्थस्यासत्यत्वम्, वाक्यार्थस्य च सत्यत्वं सूचितमिति।

प्रतिभायाः स्वरूपमुक्तं भर्तृहरिः–

इदं तदिति सान्येषामनाख्येया कथञ्चन।
प्रत्यात्मवृत्ति सिद्धा सा कर्माणि न निरूप्यते।।[4]

उपजायमाना सा च प्रतिभाऽन्यस्याख्यातुं न शक्यते, किन्तु स्वसंवेदनसिद्धैव। अयमाशयः – समुत्पन्नाऽपि सा स्वसंवेदन समये ''इदमाकारिका इयम्'' इति विशिष्यान्यस्य निरूपयितुं न शक्यते।

प्रतिभायाः स्वभावमुक्तं भर्तृहरिः–

उपश्लेषमिवार्थानां सा करोत्यविचारिता।
सार्वरूप्यमिवापन्ना विषयत्वेन वर्तते।।[5]

असंसृष्टानां पदार्थानामियं प्रतिभाऽज्ञातापि उपश्लेषम् करोति। सर्वप्रकारके च वाक्येऽसौ पदार्थानांविषयो भवति।

प्राणिमात्रमपि तां प्रतिभां नातिवर्तत इत्याह–
साक्षाच्छब्देन जनितां भवनानुगमेन वा।
इति कर्तव्यतायां तां न कश्चिदतिवर्तते।।[6]

कदाचित् सा व्यवहारकाले साक्षाच्छब्देन जन्यते, कदाचिच्च जन्मान्तरभावनावशेन। गजवाजिप्रभृतीनां सर्वेषामपि तन्मूल एव सर्वव्यवहार।

इयञ्च प्रतिभा सर्वस्य सिद्धैवेत्याह–

यथा द्रव्यविशेषाणां परिपाकैरयत्नजाः।
समारम्भाः प्रतीयन्ते तिरश्चामपि तद्वशात्।।[7]

यथा मनुष्यादिनां काचन प्रवृत्तिः शिक्षामन्तरैव सम्पद्यते, तस्याश्च परिज्ञानं परिणामैः भवति। तथैव पशुपक्षिणामपि प्रयत्नाः केनाप्यशिक्षिताः जन्मान्तर संस्कारवशादुत्पद्यन्ते। अन्तः करणवृत्तिविशेषरूपा चेयं प्रतिभा एतज्जन्मसंस्कारजा जन्मान्तरसंस्कारजाऽपि। समर्थयते चामुमर्थं भर्तृहरिः–

स्वरवृतिं विकुरूते मधौ पुंस्कोकिलस्य कः।
जन्त्वादयः कुलायादिकरणे केन शिक्षिताः।।[8]

मधुमासे पञ्चमस्वरविरावः केन शिक्षितः ? लूतातन्तूनां कुलायरचना च प्रतिभामाहात्म्यादेव जायते।

एवञ्च ''अखण्ड स्फोट लक्षण एकः शब्दो वाक्यम्'', प्रतिभा च वाक्यार्थः अध्यास एव सम्बन्धः वाच्यवाचकभावापरपर्यायाशक्तिः, तस्या ज्ञापकमितरतराध्यासमूलं तादात्म्यमिति।

**संदर्भ सूची**

1- पस्प0 भा0 वा0।
2- वै0 भू0 सा0 का0 25।
3- वा0 प0 ख0 2 का0 145।
4- वा0 प0 ख0 2 का0 146।
5- वा0 प0 ख0 2 का0 14।
6- वा0 प0 ख0 2 का0 15।
7- वा0 प0 ख02 का0 149।
8- वा0 प0 ख0 2 का0 151।